॥ श्रीकृष्णपद्यम् (कंदुकस्तुतिः) ॥

अंबरगंगाचुंबितपादः पदतलविदलितगुरुतरशकटः ।
कालियनागक्ष्वेलनिहंता सरसिजनवदलविकसितनयनः ॥ १ ॥

कालघनालीकर्बुरकायः शरशतशकलितरिपुशतनिवहः ।
संततमस्मान् पातु मुरारिः सततगसमजवखगपतिनिरतः ॥ २ ॥

॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचितं श्रीकृष्णपद्यम् (कंदुकस्तुतिः) ॥

www.yousigma.com